कूर्मो गार्त्समदो, गृत्समदो वा। आदित्यः। त्रिष्टुप्

**इमा गिर आदित्येभ्यो घृतस्नूः सनाद्राजभ्यो जुह्वा जुहोमि।**

**शृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरुणो दक्षो अंशः॥ २.०२७.०१**

इमाः- एतान्। घृतस्नूः- दीप्तिमतः। गिरः- मन्त्रान्। जिह्वा- वाचा। सनात्- सनातनकालतः। आदित्येभ्यः- अखण्डप्रकृतिजेभ्यः। जुहोमि- यच्छामि। मित्रः- स्नेहाधिदेवता। अर्यमा- औदार्याधिदेवता। भगः- सौभाग्याधिदेवता। तुविजातः- बहुधा जातः। वरुणः- ऋताधिदेवता। दक्षः- समर्थः। अंशः- सोमो रसाधिदेवता। नः- अस्मन्मन्त्रान्। शृणोतु- एकैकशः शृणोतु ॥१॥

**इमं स्तोमं सक्रतवो मे अद्य मित्रो अर्यमा वरुणो जुषन्त।**

**आदित्यासः शुचयो धारपूता अवृजिना अनवद्या अरिष्टाः॥ २.०२७.०२**

मे- मम। इमम्- एतम्। स्तोमम्- मन्त्रम्। अद्य- इदानीम्। मित्रः- स्नेहाधिदेवता। अर्यमा- दानाधिदेवता। वरुणः- ऋताधिदेवता। सक्रतवः- सप्रज्ञाः। जुषन्त- सेवन्ताम्। आदित्यासः- अखण्डप्रकृतिजाः। शुचयः- शुद्धाः। धारपूताः- रसधारया पवित्राः। अवृजिनाः- अदुःखाः। अनवद्याः- वीतमलाः। अरिष्टाः- अहिंसकाः ॥२॥

**त आदित्यास उरवो गभीरा अदब्धासो दिप्सन्तो भूर्यक्षाः।**

**अन्तः पश्यन्ति वृजिनोत साधु सर्वं राजभ्यः परमा चिदन्ति॥ २.०२७.०३**

ते- अमी। आदित्यासः- अखण्डप्रकृतिजाः। उरवः- विस्तीर्णाः। गभीराः- अगाधाः। अदब्धासः- शत्रुवशमप्राप्ताः। दिप्सन्तः- शत्रून् वशीकुर्वन्तः। भूर्यक्षाः- प्रभूतदर्शनाः। अन्तः- जीवानामन्तः। वृजिना- पापानि। उत- अपि च। साधु- पुण्यानि। पश्यन्ति। सर्वम्। परमा- दूरस्थमपि। राजभ्यः- आदित्येभ्यः। अन्ति- अन्तिके भवति ॥३॥

Dr. Ranganji

WEBOLIM

**धारयन्त आदित्यासो जगत्स्था देवा विश्वस्य भुवनस्य गोपाः।**
**दीर्घाधियो रक्षमाणा असुर्यमृतावानश्चयमाना ऋणानि॥ २.०२७.०४**

आदित्यासः- अखण्डप्रकृतिजाः। जगत्- विश्वम्। धारयन्तः। स्थाः- भवथ। देवाः- द्योतनशीलाः। विश्वस्य- सर्वस्य। भुवनस्य- जगतः। गोपाः- रक्षकाः। दीर्घधियः- दीर्घधारणावन्तः। असुर्यं- प्राणम्। रक्षमाणाः- पालयन्तः। ऋणानि- देवर्णानि मनुष्यरचितयज्ञेन। चयमानाः- नाशयन्तः। ऋतवानाः- प्रकृतिनियतिभूतसत्यरक्षका भवन्ति ॥४॥

**विद्यामादित्या अवसो वो अस्य यदर्यमन्भय आ चिन्मयोभु।**
**युष्माकं मित्रावरुणा प्रणीतौ परि श्वभ्रेव दुरितानि वृज्याम्॥ २.०२७.०५**

आदित्याः- हे अखण्डप्रकृतिजाः। वः- युष्माकम्। अस्य अवसः- एतस्या रक्षायाः। विद्याम्- ज्ञानवान् भवेयम्। यत्- या रक्षा। भये। चित्- अपि। मयोभु- सुखकारिणी भवति। अर्यमन्- हे दानाधिदैवत। मित्रावरुणा- हे स्नेहाधिदैवत हे ऋताधिदैवत। युष्माकम्- वः। प्रणीतौ- प्रकर्षनीत्याम्। परि- परितः। श्वभ्रेव- गर्तभूतानि। दुरितानि- पापानि। वृज्याम्- त्यजामि ॥५॥

**सुगो हि वो अर्यमन्मित्र पन्था अनृक्षरो वरुण साधुरस्ति।**
**तेनादित्या अधि वोचता नो यच्छता नो दुष्परिहन्तु शर्म॥ २.०२७.०६**

अर्यमन्। मित्र। वरुण। वः- युष्माकम्। पन्थाः- मार्गः। सुगः- सुगम्यः। अनृक्षरः- अकण्टकः। साधुः। अस्ति- भवति। तेन- तं मार्गम्। आदित्याः- हे अखण्डप्रकृतिजाः। नः- अस्मभ्यम्। अधि वोचत- उपदिशत। नः- अस्मभ्यम्। दुष्परिहन्तु- परिहर्तुमशक्यम्। शर्म- भद्रम्। यच्छत- दत्त ॥६॥

**पिपर्तु नो अदिती राजपुत्राति द्वेषांस्यर्यमा सुगेभिः।**
**बृहन्मित्रस्य वरुणस्य शर्मोप स्याम पुरुवीरा अरिष्टाः॥ २.०२७.०७**

Dr. Rangan Ji
WEBOLIM

राजपुत्रा- देवमाता। अदितिः- अखण्डप्रकृतिः। नः- अस्मान्। पिपर्तु- पूरयतु। अर्यमा- दानाधिदेवता। सुगेभिः- सुखेन। द्वेषांसि- द्वेषभावनानि। अति- तारयतु। पुरुवीराः- प्रभूतवीर्यसम्पन्नाः। अरिष्टाः- अहिंसकाः। मित्रस्य। वरुणस्य। बृहत्- महति। शर्म- भद्रे। उप स्याम- भवेम ॥७॥

**तिस्रो भूमीर्धारयन्त्रीँरुत द्यून्त्रीणि व्रता विदथे अन्तरेषाम्।**
**ऋतेनादित्या महि वो महित्वं तदर्यमन्वरुण मित्र चारु॥ २.०२७.०८**

एषाम्- एतेषां देवानाम्। अन्तः- मध्ये। विदथे- यज्ञे। तिस्रो भूमीः। त्रीन् द्यून्। उत- अपि च। धारयन्- धारयन्ति। अर्यमन्। वरुण। मित्र। आदित्याः। ऋतेन- प्रकृतिनियतिभूतसत्येन। वः- युष्माकम्। महित्वम्- महिमा। महि- महान्। चारु- कल्याणो भवति ॥८॥

**त्री रोचना दिव्या धारयन्त हिरण्ययाः शुचयो धारपूताः।**
**अस्वप्नजो अनिमिषा अदब्धा उरुशंसा ऋजवे मर्त्याय॥ २.०२७.०९**

हिरण्ययः- दीप्ताः। शुचयः- पवित्राः। धारपूताः- रसपवित्रिताः। अस्वप्नजः अनिमिषाः- जागरूकाः। अदब्धाः- अहिंस्याः। उरुशंसाः- बहुधा मन्त्रेषु प्रशंसिताः। ऋजवे- सत्यनिष्ठाय। मर्त्याय- मनुष्याय। त्री रोचना दिव्या- भूर्भुवःसुवरादीनि। धारयन्त- धारयन्ति ॥९॥

**त्वं विश्वेषां वरुणासि राजा ये च देवा असुर ये च मर्ताः।**
**शतं नो रास्व शरदो विचक्षेऽश्यामायूंषि सुधितानि पूर्वा॥ २.०२७.१०**

असुर- प्राणद। वरुण- ऋताधिदेवत। ये च देवा ये च मर्ताः- ये देवा मनुष्याः सन्ति तेषाम्। विश्वेषाम्- सर्वेषाम्। त्वम्- भवान्। राजा- ईश्वरः। असि- भवति। विचक्षे- विशेषदर्शनाय। नः- अस्मभ्यम्। शतं शरदः- शतायुः। रास्व- देहि। पूर्वा- सनातनसन्मार्गस्थानि। सुधितानि- शोभनधारणायुतानि। आयूंषि। अश्याम- अनुभवेम ॥१०॥

Dr. Ranganji

WEBOLIM

**न दक्षिणा वि चिकिते न सव्या न प्राचीनमादित्या नोत पश्चा।**

**पाक्या चिद्वसवो धीर्या चिद्युष्मानीतो अभयं ज्योतिरश्याम्॥ २.०२७.११**

दक्षिणा- भवतां दक्षिणो भागः। न वि चिकिते- न विशेषेण ज्ञायते। न सव्या- न वामो भागः। आदित्याः- हे देवाः। न प्राचीनम्- न पुरोभागः। उत- अपि च। न पश्चा- न पृष्ठभागः। वसवः- हे शरण्याश्चित्तवृत्तिस्तम्भकारकाः। वस निवासे। वसु स्तम्भे। पाक्या- तस्माद्भवद्भिः पक्तव्योऽहम्। धीर्या- धारणाकुशलः सन्। युष्मानीतः- युष्माभिर्नीतः। अभयं ज्योतिः- ज्ञानप्रकाशम्। अश्याम्- अनुभवेयम्॥११॥

**यो राजभ्य ऋतनिभ्यो ददाश यं वर्धयन्ति पुष्टयश्च नित्याः।**

**स रेवान्याति प्रथमो रथेन वसुदावा विदथेषु प्रशस्तः॥ २.०२७.१२**

यः। ऋतनिभ्यः- प्रकृतिनियतिभूतसत्यनेतृभ्यः। राजभ्यः- देवेभ्यः। ददाश- ददाति। यम्। नित्याः- सनातनाः। पुष्टयः- पोषकाः। च। वर्धयन्ति। सः। रेवान्- दानयोग्यधनयुक्तः। प्रथमः- मुख्यः सन्। रथेन- स्ववाहनेन। याति- गच्छति। वसुदावा- सम्पद्दायकः सन्। विदथेषु- यज्ञेषु। प्रशस्तः- यशस्वी भवति॥१२॥

**शुचिरपः सूयवसा अदब्ध उप क्षेति वृद्धवयाः सुवीरः।**

**नकिष्टं घ्नन्त्यन्तितो न दूराद्य आदित्यानां भवति प्रणीतौ॥ २.०२७.१३**

यः। आदित्यानाम्- अखण्डप्रकृतिजानाम्। प्रणीतौ- प्राकर्षनीत्याम्। भवति- अस्ति। सः। शुचिः- परिशुद्धः सन्। अपः- उदकानि। सूयवसाः- शोभनसस्यानि। अदब्धः- अहिंसितः। वृद्धवयाः- प्रभूतान्नः। सुवीरः- शोभनवीर्यसम्पन्नः। उप क्षेति- निवसति। तम्। न अन्तितः। न दूरात्। नकिः- न। घ्नन्ति- अन्तराया हिंसन्ति॥१३॥

**अदिते मित्र वरुणोत मृळ यद्वो वयं चकृमा कच्चिदागः।**

Dr. Rangaji
WEBOLIM

**उर्वश्यामभयं ज्योतिरिन्द्र मा नो दीर्घा अभि नशन्तमिस्राः॥ २.०२७.१४**

अदिते- अखण्डप्रकृतिज। मित्र- स्नेहाधिदैवत। उत- अपि च। वरुण- ऋताधिदैवत। मृळ- आनन्दयत। वयम्। वः- युष्माकम्। यत् कच्चित्- यत्किञ्चित्। आगः- द्रोहम्। चकृम- कृतवन्तः। तन्नाशयतेति शेषः। इन्द्र- परमेश्वर। उरु- विस्तृतम्। अभयं ज्योतिः- ज्ञानप्रकाशम्। अश्याम्- अनुभवेयम्। दीर्घाः- दीर्घाः। तमिस्राः- अन्धकाराः। नः- अस्मान्। मा अभि नशन्- मा व्याप्नुवन्तु ॥१४ ॥

**उभे अस्मै पीपयतः समीची दिवो वृष्टिं सुभगो नाम पुष्यन्।**
**उभा क्षयावाजयन्याति पृत्सूभावर्धौ भवतः साधू अस्मै॥ २.०२७.१५**

अस्मै- एतस्मै। समीची- सङ्गते द्यावापृथिव्यौ। उभे। पीपयतः- वर्धयतः। सुभगो नाम- सौभाग्यवान्। दिवः- नभसः। वृष्टिम्। पुष्यन्- पोषयन् भवति। पृत्सु- वृत्रैर्जनितेषु युद्धेषु। उभौ क्षयौ- उभे आधिभौतिकाध्यात्मिके। आजयन्- रक्षोभ्यो जयन्। याति- गच्छति। अस्मै- एतस्मै यजमानाय। उभौ अर्धौ- उपासकस्य उभावंशौ दैवं मानुषञ्च। साधू। भवतः ॥१५ ॥

**यावोमायाअभिद्रुहेयजत्राःपाशाआदित्यारिपवेविचृत्ताः।**
**अश्वीवताँअतियेषंरथेनारिष्टाउरावाशर्मन्स्याम॥२.०२७.१६**

अभिद्रुहे- द्रोहिणे। रिपवे- शत्रवे। वः- युष्माकम्। याः। मायाः- मायामयाः। पाशाः। विचृताः- हिंसार्थं प्रसारिताः। अश्वीव- तुरगवाहन इव। तान्। रथेन- ऋताख्यरथेन। अति येषम्- अतितरेयम्। आदित्याः- हे देवाः। अरिष्टाः- अहिंसका वयम्। उरौ- विस्तीर्णे। शर्मन्- मङ्गळे। आ- आभिमुख्येन। स्याम- भवेम ॥१६ ॥

**माहं मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः।**
**मा रायो राजन्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः॥ २.०२७.१७**

Dr. Rangaraj
WEBOLIM

वरुण- ऋताधिदैवत। अहम्। मघोनः- धनवतः। प्रियस्य। भूरिदाव्नः- भूरिदातुरपि। आपेः- बन्धुवर्गानां पुत्रपौत्रादिकानाम्। शूनम्- दारिद्र्यं। न आविदम्- न निवेदयानि। याचनार्थं न गच्छेयम्। स्वायासेनैव दारिद्र्यं नाशयानि। माहं राजन्नन्यकृतेन भोजमिति श्रुतेः। राजन्। सुयमात्- सुष्ठु नियमितात् स्वार्जितादिति भावः। रायः- वित्तात्। मा अव स्थाम्- भ्रष्टो मा भवेयम्। विदथे- यज्ञे विद्वत्सदसि। सुवीराः- शोभनवीर्यसम्पन्नाः सन्तः। बृहत्- महत्। वदेम ॥१७॥

Dr. Ranganji

WEBOLIM